श्रीकार्ल-कापेलर-विरचितम्
यवनशतकम्

सं– गयाचरणत्रिपाठी

होमेर-प्रभृतीनां यवनकवीनां काव्यामृतं संस्कृतगिरा निष्पीड्य ददाति शतकेऽस्मिन् पाश्चात्त्यः कविः।

होमेर (**Homer**)

१. न राज्यं बहुभिः कार्यमेकः शास्तु प्रजा विभुः।
लोकत्राणाय यो देवैरमरैर्विनियोजितः।।

२. यादृशानि हि पत्राणि तादृशाः सन्ति मानुषाः।
यथा पत्राणि वृक्षेभ्यो निपतन्ति महीतले।।

रोहन्ति च पुनर्वातैः प्रेर्यमाणानि माधवैः।
एवं कुलानि जायन्ते विनश्यन्ति च देहिनाम्।।

३. न हि कश्चिज्जनो दैवमतिवर्तितुमर्हति।
क्षुद्रकः स्यादुदारो वा जन्म यो लब्धवान् भुवि।।

४. अनग्निमनिकेतञ्च कुलघ्नं विद्धि तं नरम्।
यो वैरं रमते कुर्वन्नेकराष्ट्रनिवासिनाम्।।

५. न हि प्राणिषु सर्वेषु पृष्ठे सर्पन्ति ये भुवः।
शोचनीयतरः कश्चिन्मनुष्यादिति मे मतिः।।

६. सूक्ष्मा जिह्वा बहून्यस्यां विविधानि वचांसि च।
यादृशं तु भवेदुक्तं प्रत्युक्तमपि तादृशम्।।

७. एतद्भवति मर्त्यानां देवैः पूर्वविनिर्मितम्।
दुःखादापतितं दुःखं, ते स्वयं सुखमासते।।

८. तद्गीतं सर्वगीतानां प्रशंसन्ति हि मानुषाः।
येनापूर्वेण कर्णानि ह्रियन्ते हृदयानि च।।

९. बहुमान्यमधीशत्वमचिराद् हि महाधनैः।
पूर्यते भवनं राज्ञो यशश्चैव विवर्धते।।

१०. केचित्तुल्यगुणाः पित्रा पापीयांसो न दुर्लभाः।
श्रेयांसस्तु पितुः पुत्रा विद्यन्ते यदि पञ्चषाः।।

११. न प्रशस्यतरं किञ्चिन्न तादृक्तृप्तिकारकम्।
यथा भर्ता च भार्या च द्वावन्योन्यवशानुगौ।।

दुर्जनानां मनःशल्यं सुहृदां नयनोत्सवः।
भूयिष्ठं तु महाप्रीत्या सुखयन्तु परस्परम्।।

१२. विधिना प्रेषितं विद्धि याचकं चातिथिं च ते।
सत्कारेण प्रतीच्छास्य दानं स्वल्पमपि प्रियम्।।

१३. न तथान्यद् यशो भाति यावज्जीवसि भूतले।
यथा यत्प्रार्ज्यते हस्तैः पादैश्चाजिषु जित्वरैः।।

१४. न सर्वेषां मनुष्याणां सर्वान् देवा ददुर्गुणान्।
स्वाकृतिं च विवेकञ्च दिव्यां चापि सरस्वतीम्।।

एकोऽङ्गदुर्बलत्वेन वैरूप्येण च योजितः।
यस्य वाक्पटुता वक्त्रे शृण्वतां सुखदायिनी।।

अन्यो रूपविशेषेण सर्वेभ्यो व्यतिरिच्यते।
न त्वस्मै ददिरे देवा हृद्यमां मधुजिह्वताम्।।

१५. पितृपैतामहे स्थाने यत्सौख्यं हृदि जायते।
न तद् दशान्तरे लभ्यं विभवेषु महत्स्वपि।।

१६. क्षेत्रं कर्तुं वरं मन्ये नरस्याधनिनो भुवि।
न तु सर्वकुलं शास्तुं प्रेतानां यममन्दिरे।।

१७. तमेवातिथयो नित्यं ध्यायन्ते मनसा नरम्।
यो गृहे प्रतिजग्राह पूजयामास च प्रियैः।।

१८. तुल्यदोषाववैम्येतौ तिष्ठन्तं योऽतिथिं गृहे।
निष्काशयितुमिच्छेत यियासुं च निरोधयेत्।।

१९. भिक्षार्थेन मनुष्या यत्पर्यटन्ति वसुन्धराम्।
सहमाना महाक्लेशांस्तस्मिन्निन्द्यो हतोदरः।।

२०. न हि कश्चिदुपायोऽस्ति क्षुद्रोगं विनिगूहितुम्।
यस्य हेतोस्तितीक्षन्ते श्रमान् बहुविधान्नराः।।
नावो दीर्घैररित्रैश्च योजयन्ति बुभुक्षया।
तितीर्षन्त उदन्वन्तं रणेषु च युयुत्सवः।।

२१. न शोच्यं मरणं पुंसः शेते यो निहितः शरैः।
रक्षणे स्वकुटुम्बस्य गवाश्वस्य च पालने।।

हेसियोद् (Hesiod)

२२. कुलालश्च कुलालाय वणिजे वणिगीर्ष्यति।
दरिद्रश्च दरिद्राय गायनाय च गायनः।।

२३. भयानां पृथिवी पूर्णा पूर्णोऽब्धिः प्रसरन्ति च।
व्याधयः परितो जन्तून् स्वयंजाताः पदे पदे।।

२४. नाद्य सूनुः पितुर्भक्तो न च सूनौ रतः पिता।
मित्रं नाद्रियते मित्रं नातिथिश्च प्रतीच्छकम्।।

न भ्रातैव प्रियो भ्रातुः पूर्वकाले यथाऽभवत्।
विजजृम्भे मनोमादः पूज्यते पापकर्मकृत्।।

नष्टो धर्मो गता लज्जा विरलान् पश्य सज्जनान्।
धूर्तो वञ्चयते वाग्भिः पद्वीभिः शपथैरुत।।

ईर्ष्या निविशते मर्त्यान् दुर्मुखी घोररूपिणी।
परव्यसनसंहृष्टा, हा धिक्कालस्य दुष्टता।।

२५. मूढाशयो बतीयांसं निरोद्धुं यो व्यवस्यति।
स पराभवमाप्नोति दुःसहां च विमाननाम्।।

२६. यो नरोऽपकरोत्यन्यमात्मन्येवापराध्यति।
दुर्मन्त्रस्योपदेष्टेव दुर्मन्त्रेण निहन्यते।।

२७. लघिमा सुलभस्तात बहुभिश्चाधिगम्यते।
तस्य संनिहितं वेश्म मार्गश्च निरुपद्रवः।।

गौरवस्यामरा देवाः स्वेदं वस्नमकल्पयन्।
तद् दीर्घेण पथा प्राप्यं विषमेणोर्ध्वगामिना।।

२८. श्रेष्ठो मां प्रति यो बुद्ध्या चिन्तयत्यात्मनो हितम्।
यः शृणोति सतां मन्त्रं सोऽपि श्लाघ्यो न संशयः।।

यस्तु नास्ति स्वयं प्राज्ञो न च कर्तुं व्यवस्यति।
हितवाक्यानि मित्राणामधमं विद्धि तं नरम्।।

२९. भोजयेः स्वगृहे मित्रममित्रं च निवारयेः।
भूयिष्ठं तु निमन्त्र्यास्ते य आसन्ननिवासिनः।।

ज्ञातव्यौ गृहवृत्तान्ते बान्धवप्रतिवेशिनौ।
विपत्तौ शरणीभूतं सौख्यदं कीर्त्तिवर्धनम्।।

३०. प्रीतिः प्रीत्या प्रतिग्राह्या दर्शनेन च दर्शनम्।
दात्रा दानपरे भाव्यमदात्रा दानरोधिनी।।

३१. अल्पमल्पं शनैश्चेयं तच्च कार्यं दिने दिने।
चिन्वतो रक्षतश्चान्ते भूयो भूयो भविष्यति।।

३२. अस्ति ग्रहीतुमातृप्ति भद्रमेतत्प्रियङ्करम्।
नास्तीति सुमहद्दुःखमिदं तात विचिन्त्यताम्।।

३३. उपरिष्टादधस्ताच्च ग्रहीतव्यं यथारुचि।
भाण्डमध्यस्थितं रक्ष्यं बुध्ने रक्षितुमप्रियम्।।

३४. न ते सीमन्तिनी चेतो मधुजिह्वा विलोभयेत्।
अभिसृत्य त्वदागारं पीनश्रोणिपयोधरा।।

३५. न बह्वतिथिना भाव्यं न चानतिथिना त्वया।
न च धूर्तसहायेन न च साधुविरोधिना।।

३६. न दोषेणावगन्तव्यमाकिञ्चन्यं मनस्विना।
दैवदत्तं हि दारिद्र्यमनिष्टं हृदयङ्गमम्।।

मिम्नेर्मोस् (Mimnermos)

३७. षष्टिवर्षस्य मे मृत्युर्भवेदिति वरो मम।
आयुषश्चानयेदन्तं व्याधिचिन्तादिभिर्विना।।

३८. न कश्चित्सुखसमृद्धो दुःखभारेण पीड्यते।[१]
यो मानुष्यकुले जातः सर्पति वसुधातले।।

३९. बहवो धनिनः पापा दरिद्रन्ति च सज्जनाः।
एतद् विधिहितं[२] लोके वयं तु न वृणीमहे।।
पुण्यादभ्युदयं (!) तेषां यस्माद् धर्मः सनातनः।
वित्तानि च मनुष्याणां गत्वराणि क्षणे क्षणे।।

४०. नाहं पञ्चत्वमृच्छेयमन्येषामश्रुभिर्विना।
अहो दुःखमिति ब्रूयुर्बान्धवाः सुहृदश्च मे।।

Theognis (थेयोग्निस्)

४१. धर्मं श्रेष्ठतमं मन्ये साधिष्ठां तु विरोगताम्।
किन्तु प्रियतमं वस्तु तल्लभ्यं यदभीप्ससि।।

४२. न सिंहोऽपि सदा मांसं भोक्तुं विन्दति पश्यत।
बलवन्तमपि क्रूरा पीडयेदनुपायता।।

४३. स्वैरिणीं योषितं द्वेष्मि नरं च रतिलम्पटम्।
पतेरन्यस्य यः क्षेत्रे कृषिं कर्तुं व्यवस्यति।।

४४. अमित्रं च गुणोपेतं न निन्देयं कदाचन।
वयस्यं च न शंसेयमनर्हं धर्मद्रोहिणम्।।

आल्क्मन् (Alkman)

४५. निद्रावशं सम्प्रति पर्वतानां शिरांसि यातानि सकन्दराणि।
इच्छन्ति शय्यां वनचारिणश्च श्यामायते च स्तिमितेव पृथ्वी।।

अनाक्रेयोन् (Anakreon)

४६. किं मे तिर्यक्कटाक्षान् विसृजसि चटुलानश्विके सिन्धुजाते
यां पश्यामि प्रचारे हरितकमदतीं लीलया वल्गमानाम्।
तिष्ठ क्षिप्रं यथा ते परिमृदुनि मुखे प्रक्षिपेयं खलीनं
पश्यारोढा जनोऽयं तुरगयमनविद् गत्यभिज्ञश्च सादी।।

पिण्डार (Pindar)

४७. मम वाणीमयं तेजो ददौ देवी सरस्वती।
अन्यद्विश्रुतमन्येषु राजा तु शिखरायते।।

४८. हर्षोत्कर्षेण संभग्नं दुःखशल्यं विनश्यति।
विधेर्यदि प्रसादेन सौभाग्यं समुपानतम्।।

४९. न विनिश्चितमायुरस्ति जन्तोर्दिवसो वा यदि सूर्यजात एषः।
परिणाममुपैष्यति सुभद्रं सुखदुःखोर्मिमयो हि जीवनाब्धिः।।

५०. अंसः (?अंशः?) कोऽपि मृतानां च धर्मेणास्ति व्यवस्थितः।
न च बान्धववात्सल्यं भस्मीभावेन हीयते।।

५१. प्रथमं सुखजीवनं धनानां सुजनेषु प्रथितं यशो द्वितीयम्।
उभयं प्रतिपद्यते जनो यः श्रिय एष प्रतिभाति वल्लभो मे।।

५२. किं हि कश्चिन्न वा कश्चिच्छायास्वप्नमयो नरः।
भासा तु दिव्यया स्पृष्टः श्रियं धत्ते सुखावहाम्।।

ऐस्ख्युलोस् (**Aeschylos**)

५३. दैवेनोपानतं यत् स्यात् तत् क्षाम्यमनसूयया।
अप्रधृष्यामवर्ज्यां च विदित्वा भवितव्यताम्।।

५४. इममेव महाव्याधिमीश्वराणां विचक्षते (प्रचक्षते?)।
न सुहृत्स्वपि विश्वासं विधातुं हितकांक्षिषु।।

५५. यस्य नास्ति स्वयं चित्तं शोकभारनिपीडितम्।
तस्य दुःखसमापन्नानुपदेष्टुं न दुष्करम्।।

५६. दुःखितः स्वयमस्मीति न तस्मादितरान् बहून्।
क्लेशेष्विच्छामि संमग्नान् सहायान् निजदुर्गतेः।।

५७. वरं मन्ये सकृन्मर्तुं प्रवेष्टुं च यमालयम्।
न तु सोढुमनिर्भिन्नां नानादुःखपरम्पराम्।।

५८. न दुःस्थितौ नाभ्युदये कदाचित् स्त्रैणं सहायं वरयेत विद्वान्।
सुखे हि तत्साहसमप्रधृष्यं भये तु नारी कुलगोत्रनिन्दा।।

५९. नभसि मेघवृते सति मानुषो भयमितश्च ततश्च विपश्यति।
दिशमतो विमलामवलोकयन्नविरतं सुदिनत्वमितीक्षते।।

६०. धन्वनश्च समुद्राच्च प्रोत्थितानि मुहुर्मुहुः।
अत्याहितानि चित्राणि पश्यन्ति चिरजीविनः।।

६१. पक्षी कथं विशुध्येत पक्षिमांसं जघास यः।
नरो यश्च बलादूढे कन्यां पितुरदायिनः।।

६२. अनीर्ष्यं सुखमिच्छामि न स्यां हर्ता पुरामहम्।
न च जीवनमापन्नो नयेयं बन्धनस्थितः।।

६३. रुदन्तमनुरोदितुं विकरुणोऽप्यवस्येज्जनः।
परस्य च सुखे भवेत् स्मितमुखो विहर्षोऽपि सन्।
नरान्तरविदस्तु ये पटुधियो विजानन्ति ते
सुहृत्स्वपि सुहृद्गतां प्रति दशां मनः शीतलाम्।।

६४. अहो विरलता नृणां सहभुवं जनेऽभ्युदयिनि क्षमां विदधताम्।
विषं हि हृदये द्विधा दहति नो निजाश्च विपदः परस्य च सुखम्।।

६५. अस्त्यतृप्तिर्हि सौख्यस्य न कश्चित् सुमहानपि।
विविक्षन्तीं गृहं लक्ष्मीमपेहीति निवारयेत्।।

६६. कुलतन्तुं वितत्वद्भिः पुंसामचिरजीविनाम्।
कीर्तिरुद्भिद्यते पुत्रैर्जालं तुम्बीफलैरिव।।

६७. बहूनि सुविभूषणानि जनयत्युपस्थे मही
तिमिङ्गिल-गिलादयो जलनिधौ प्लवन्ते झषाः।
पतन्ति च नभस्तलाद् बहुविधा महोल्काः क्वचिद्
वने च मृगपक्षिणोऽनिलवशात् त्रसन्त्युल्बणात्।।

नरस्य तु महामदः कथयितुं कथं शक्यते
स्त्रियश्च मदनोत्थितं हुतवहोपमं साहसम्।
वियोजयति यज्जनौ सहचरौ व्रतस्थौ पुरा
पशूनिव च मिश्रयत्यसमसायकोन्मादितान्।।

६८. मैथुनं खलु दम्पत्योर्दिव्यधर्मप्रतिष्ठितम्।
गरीयः शपथादुग्राद् रक्षणीयं च मेनिरे।।

६९. नानोपायैर्विमोच्येरन् बन्धनानि दृढान्यपि।
पीते तु रुधिरे भूम्या जीवनं न निवर्तते।।

७०. वृथैव माता जननीत्यवाचि पिता यथार्थं जनयत्यपत्यम्।
रेतो दधद् यद् विधिवद् गृहीतं बिभर्त्यसौ प्राप्तदिनं च सूते।।

सोफ़क्लेस् (Sophokles)

७१. न सुप्रतिष्ठितानाहुरल्पकान् महता विना।
महांस्तु विधृतो ह्रस्वैकन्नतिं प्रतिगच्छति।।

७२. कष्टात् कष्टतरं यस्य स्वयं शोकजलार्णवे।
निमग्नस्य न सन्त्यन्ये समानार्तिसमन्विताः।।

७३. अचैतन्ये स्थितिं मन्ये जनस्य परमं सुखम्।
बालो यावन्न जानाति हर्षशोको यमावमू।।

७४. कालेन सृज्यते सर्वं कालेन च विनश्यति।
इत्यनाशा च कर्तव्या निःसंख्या हि दिने क्षणाः।।

७५. सत्यमेवास्ति तद्वाक्यं मानुषेषु यदीरितम्।
अदानान्यरिदानानि नार्थकानि च कर्हिचित्।।

७६. द्वेषणीयस्तथा शत्रुर्यथा भावी सुहृत्पुनः।
एवं चैव प्रियः सेव्यो यथा द्वेक्ष्यसि यं क्वचित्।।

७७. तत् तद् बहुविधं मर्त्यो यावज्जीवति पश्यति।
भविष्यं तु न जानाति दुःखं स्यादथवा सुखम्।।

७८. अवितथं तदवाचि पुरातनैर्यदहितं हितवन्मतिविभ्रमात्।
विधिहतं प्रतिभाति शरीरिणं तदनु नाशपथं प्रतियाति सः।।

७९. किं तु किञ्चिद्धि पुत्राणां मण्डनं भुवने वरम्।
समृद्धस्य पितुर्भाग्यात् पितुर्वा सूनुसौष्ठवात्।।

८०. आश्चर्याणि बहूनि सन्ति न तथा किञ्चिन्मनुष्यो यथा
यो नौभिः प्लवते महाजलनिधिं वातेरितं दारुणम्।
पृष्ठे यश्च वसुन्धरां भगवतीं देवीं क्षमाशालिनीं
गोयुक्तेन विदारयत्यविरतं सीतां हलेनोत्कषन्।।

जाले यश्च पलान् मनोऽधिकतया गृह्णाति घोरे वने
क्षुद्राक्षैर्मृगपक्षिणो झषकुलं यश्चोद्धरत्यर्णवात्।
तेनोत्कृष्टधिया नरेण महिषो वाजी च केशन्वितो
द्वावेतौ वनचारिणावदमितौ दान्त्वा युगे योजितो।।

यो बुद्ध्या समचिन्तयद् व्यवहृतिं धर्मांश्च वास्तुक्षितः
शीतान् वर्जयितुं दिवश्च तुहिने ग्रीष्मे सुतप्तान् शरान्।
किं नासौ कृतवान् करिष्यति न वा मृत्योर्य उग्रं वशं

मोघीकर्तुमशक्नुवञ्जनरुजान् व्याधीन् बभञ्जौषधैः।।

८१. ईशेशातां समरविजयिन् कामसङ्कल्पयोने
मृद्वोर्नक्तं स्वपिषि सुसुखं गण्डयोर्यस्तरुण्याः।
हित्वा ग्रामांस्तरसि च जलं वारिधेः को नराणां
को देवानां तव न गमितो लक्ष्यतामायुधानाम्।।

औत्सुक्येन प्रचटुलदृशां लम्भयन् कामिनीनां
धर्मासक्तान् मनसिज नरान् कारयस्यप्यकार्यम्।
सीदस्यन्तःपरिषदि सह स्थाविरैर्मन्त्रिभिस्त्वं
मल्लश्चैव प्रतिभटगलेऽनङ्ग पादं ददासि।।

८२. को हि द्वित्रानपि प्राज्ञो दिवसान् परिकल्पयेत्।
न हि श्वोऽस्ति ध्रुवं तावद् यावदद्य न यापितम्।।

८३. जनानां धर्मशीलानां निकषः कालपर्ययः।
एकेनैव मुहूर्तेन प्रकाश्यन्ते खला नराः।।

८४. सर्वेषामपि शल्यानां मध्ये हृदयभेदिनाम्।
न तथा बाधते किञ्चिद् यथा दुःखं स्वयं वृतम्।

८५. मनुष्योऽस्मीति जानेऽहमध्रुवं श्वोदिनं मम।
यथा तव यथामुष्य यथान्यस्य च कस्यचित्।।

८६. आयुर्दीर्घतरं य इच्छति जनः प्राज्ञेतरं वच्मि तं
नानादुःखदमेव तद् दिनदिनात् प्रोत्तारितं जीवनम्।
तृप्तिः का हि भवेत् पथि श्रमवतो दूरे यदन्ते स्थितो
मृत्युर्मौनमयः समस्तभुवनद्विष्टश्च मोक्तापि सन्।।

८७. भावाच्छ्रेयानभावो यदि तु विधिवशात् प्राप्यते जन्म भूमौ
सद्यो मृत्युं द्वितीयं चल मनसि गते यौवने किं हि शिष्टम्।
ईर्ष्यालोभावकृष्टं कलहरणवधैरायुरत्येति पुंसां
रम्यैर्यावद् विहीनानभिभवति जरा सर्वशोकस्य योनिः।।

एउरिपिदेस् (Euripides)

८८. यथैवाकुशलाः सन्ति साधने हितकर्मणाम्।
एवं दुष्टेषु कार्येषु बहूपायाः सदा स्त्रियः।।

८९. को हि निश्चिनुयादर्थं सत्यासत्यं च निर्णयेत्।
उभयोर्वचनं यावन्न सम्यगवधारितम्।।

९०. मौनमाचरितुं नित्यं विनयं च विरक्षितुम्।
न च गन्तुं बहिर्गेहाद् भूषणं योषितां परम्।।

९१. स्वतन्त्र इत्येव न कश्चिदुच्यताम्
एको धनस्यैति हठस्य वाऽऽश्रयम्।
धर्मेण वा पौरजनेन वा परः
स्वैरं विहर्तुं सततं विरुध्यते।।

९२. ध्रुवं न किञ्चिन्न यशो न सौष्ठवं न कं दशायोगमुपैष्यसि क्वचित्।
एवं हि देवा विदधुः प्रियाप्रियैरस्माकमायूंषि हविर्बुभुक्षया।।

९३. न कस्यचिन्मां प्रति किञ्चिदन्यत्प्रियं भवत्यात्मनि जन्मदेशात्।
मनो हि धीश्चिद् हृदयञ्च सर्वमपहृनुवानस्य च तद्गतानि।।

९४. न हि कश्चिन्मनुष्याणामर्थस्य सदृशो गुणः।
पात्रतां येन गच्छन्ति बलं चाप्रतिमं भुवि।।

९५. अकृत्रिमं सत्यवचः स्वभावतः स्फुटार्थतां याति पटूक्तिभिर्विना।
व्यलीकवागामयवत् पदे पदे महौषधानामुपयोगमर्हति।।

९६. आचारो यदि भेत्तव्यो राज्यार्थेनैव भिद्यताम्।
शेषे [?षो?] धर्मपथः पाल्यो न च हेयः कदाचन।।

९७. भूयो भूय इति प्राज्ञो न ब्रूयान्न च चिन्तयेत्।
तेन यज्जीवनायालं भवेत् सन्तुष्टमानसः।।

९८. येन भार्या सती प्राप्ता सुखं तस्य सनातनम्।
गृहे गृहबहिश्चाधिं ददाति कुकुटुम्बिनी।।

थेग्प्रोक्रित् (Theckrit)

९९. मा विषादं गमस्तात श्वो हि श्रेयो भविष्यति।
आशा धारयति प्राणान् मृता एव निराशकाः।।

१००. द्रुमाणां तुहिनं कष्टं निम्नगानामवृष्टिता
पाशबन्धो विहङ्गानां श्वापदानां च वागुरा।
यूनो मृगदृशां चिन्ता भगवन् बलसूदन!
नाहमेकः सकामोऽस्मि नारीसक्तो भवानपि [?भवन्नपि?]।।

---

१. प्रथमपादे षष्ठाक्षरस्य लघुत्वं चिन्त्यं, तत्तु स्वरात्मकस्य ऋकारस्य इकारामिश्रित-रकारवर्णवदुच्चारणेन, 'समृद्धो' इत्यस्य निष्ठान्तशब्दस्य 'सम्रिद्धो' इतिवदुच्चारणेन जातमिति स्पष्टम्। सं.

२. हितं=कृतं, 'दधातोर्हि'

छन्दोनिर्देशः

औपच्छन्दसिकः	–	४९, ५१
उपजातिः	–	४५, ५८, ७०, ९३
वंशस्थम्	–	९१, ९२, ९५
द्रुतविलम्बितम्	–	५९, ७८
जलोद्धतगतिः	–	९४
मन्दाक्रान्ता	–	८१
पृथ्वी	–	६३, ६७
शार्दूलविक्रीडितम्	–	७०, ७६
स्रग्धरा	–	४६, ८७

सर्वाणि शेषाणि पद्यानि अनुष्टुप्-वृत्ते बद्धानि